# Shivastutishlokah

# શિવસ્તુતિશ્લોકાઃ

## Document Information

Text title : Shivastutishlokah

File name : shivastutishlokAH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | vAvRittashlokAH ||adhyAyaH 1 | 1751||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# શિવસ્તુતિશ્લોકાઃ

બાલઃ -
ગૌરીમનોહરપદામ્બુજમાદરેણ વન્દે
મુકુન્દનયનામ્બુજપૂજિતં મે ।
આનન્દસુન્દરમરન્દવિનોદધારા
ધારાવરં સુખદમાશુ મુહુઃ સ્મરામિ ॥ ૧૬.૪॥

ઉમાકટિતટસ્ફુરત્કરિવરાનનાલોકન-
પ્રસન્નહૃદયં ધિયા સદયમિન્દુચૂડં મૃડમ્ ।
ઉમાપરિબૃઢં ભજે ભજનમાતૃદત્તેપ્સિતં
સ્મિતાનનમનામયં પ્રિયમુમાસહાયં મુદા ॥ ૧૬.૪॥

રાજ્ઞી -
હારોપહારપરિકલ્પિતનીરધારા-
માહારમેત્ય કુરુતોદરપૂરણાય ।
વિશ્વેશ્વરસ્મરણમેવ કરોમિ ચિત્તે
કૃત્વા શિવાપતિપદામ્બુજમાદરેણ ॥ ૧૮.૧૧૩॥

રતિપતિહિતભૂતક્રોડયા ક્રીડયાડલં
રમણિચરણઘાતૈઃ તત્કરાવેષ્ટનૈશ્ચ ।
અલમલમનુવેલં કાલકાલાબલાયાઃ
ચરણકમલશોભામેવ નિત્યં સ્મરામિ ॥ ૧૮.૧૧૪॥

ગૌરીમનોહરપદામ્બુજમાદરેણ સ્મૃત્વા
તરન્તિ ખલુ પાતકપાવકાધીન્ ।
તસ્માદનન્યશરણઃ શિવપાદપદ્મં
પદ્માપતિપ્રિયમહં શરણં વ્રજામિ ॥ ૧૮.૧૧૫॥

નાન્યન્મનોહરમઘાપહમસ્તિ લોકે
ગૌરીમનોહરપદામ્બુરુહં વિહાય ।

તત્કેવલં શરણમિત્યહમાદરેણ સ્મૃત્વા
વસામિ વિપિને શિવમન્દિરેષુ ॥ ૧૮.૧૧૬॥

સંસારદુઃખમઘકોટિકુલાકુલત્વાત્
ત્યાજ્યં મનાગપિ ન તેન સુખં કદાપિ ।
જન્મવ્યપાયકરણં પરમિન્દુમૌલિપાદાર-
વિન્દભજનં પ્રવદન્તિ ધીરાઃ ॥ ૧૮.૧૧૭॥

અહો મહાપાતકરાશિકોટિતૂલાનલઃ શઙ્કરલિઙ્ગપૂજા ।
સા દુર્લભા ભાગ્યવશેન લોકે તપસ્યયા સ્યાત્ સુલભા વિમુક્ત્યૈ ॥ ૧૮.૧૨૧॥

ચિત્રકેતુઃ -
ભવાનીપતે પાહિ પાહિ ત્રિશૂલિન્ ભવત્પાદુકારાધકા લોકનેન ।
મનો મે પ્રવૃત્તં ભવત્પાદપદ્મે પ્રણાસપ્રવાહસ્તવાયં મહેશ ॥ ૨૨.૯૭॥

સત્યમૂર્તિઃ -
પ્રભાવમીશાર્ચનતત્પરાણાં વક્તું ન શક્તોઽસ્તિ ન વેદરાશિઃ ।
શ્રાન્તાશ્ચ વેદાન્તવિચારતાન્તાસ્તે શાઙ્કરારાધનસેવકાઃ સ્યુઃ ॥ ૪૬.૨૧૦॥

ધન્યં ચિત્તં શઙ્કરધ્યાનલોલં ધન્યે નેત્રે લિઙ્ગસન્દર્શનેન ।
ધન્યૌ હસ્ત લિઙ્ગસમ્પૂજનાદ્યૈઃ ધન્યા જિહ્વા શાઙ્ગસઙ્કીર્તનેન ॥ ૪૬.૨૧૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે હરાખ્યે શિવસ્તુતિશ્લોકાઃ સમ્પૂર્ણાઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Shivastutishlokah*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*